# महाप्रस्थानिक पर्व

## Chapter 1

१ [ज]
एवं वृष्ण्यन्धककुले शरुत्वा मौसलम आहवम
पाण्डवाः किम अकुर्वन्त तथा कृष्णे दिवं गते
२ [वै]
शरुत्वैव कौरवो राजा वृष्णीनां कदनं महत
परस्थाने मतिम आधाय वाक्यम अर्जुनम अब्रवीत
३ कालः पचति भूतानि सर्वाण्य एव महामते
कर्म नयासम अहं मन्ये तवम अपि दरष्टुम अर्हसि
४ इत्य उक्तः स तु कौन्तेयः कालः काल इति बरुवन
अन्वपद्यत तद वाक्यं भरातुर जयेष्ठस्य वीर्यवान
५ अर्जुनस्य मतं जञात्वा भीमसेनो यमौ तथा
अन्वपद्यन्त तद वाक्यं यद उक्तं सव्यसाचिना
६ ततो युयुत्सुम आनाय्य परव्रजन धर्मकाम्यया
राज्यं परिददौ सर्वं वैश्य पुत्रे युधिष्ठिरः
७ अभिषिच्य सवराज्ये तु तं राजानं परिक्षितम
दुःखार्तश चाब्रवीद राजा सुभद्रां पाण्डवाग्रजः
८ एष पुत्रस्य ते पुत्रः कुरुराजो भविष्यति

1 [j]
evaṃ vṛṣṇyandhakakule śrutvā mausalam āhavam
pāṇḍavāḥ kim akurvanta tathā kṛṣṇe divaṃ gate
2 [vai]
śrutvaiva kauravo rājā vṛṣṇīnāṃ kadanaṃ mahat
prasthāne matim ādhāya vākyam arjunam abravīt
3 kālaḥ pacati bhūtāni sarvāṇy eva mahāmate
karma nyāsam ahaṃ manye tvam api draṣṭum arhasi
4 ity uktaḥ sa tu kaunteyaḥ kālaḥ kāla iti bruvan
anvapadyata tad vākyaṃ bhrātur jyeṣṭhasya vīryavān
5 arjunasya mataṃ jñātvā bhīmaseno yamau tathā
anvapadyanta tad vākyaṃ yad uktaṃ savyasācinā
6 tato yuyutsum ānāyya pravrajan dharmakāmyayā
rājyaṃ paridadau sarvaṃ vaiśya putre yudhiṣṭhiraḥ
7 abhiṣicya svarājye tu taṃ rājānaṃ parikṣitam
duḥkhārtaś cābravīd rājā subhadrāṃ pāṇḍavāgrajaḥ
8 eṣa putrasya te putraḥ kururājo bhaviṣyati

यदूनां परिशेषश च वज्रो राजा कृतश च ह
९ परिक्षिद धास्तिन पुरे शक्र परस्थे तु यादवः
वज्रो राजा तवया रक्ष्यो मा चाधर्मे मनः कृथा
१० इत्य उक्त्वा धर्मराजः स वासुदेवस्य धीमतः
मातुलस्य च वृद्धस्य रामादीनां तथैव च
११ मातृभिः सहधर्मात्मा कृत्वोदकम अतन्द्रितः
शराद्धान्य उद्दिश्य सर्वेषां चकार विधिवत तदा
१२ ददौ रत्नानि वासांसि गरामान अश्वान रथान अपि
सत्रियश च दविजमुख्येभ्यो गवां शतसहस्रशः
१३ कृपम अभ्यर्च्य च गुरुम अर्थमानपुरस्कृतम
शिष्यं परिक्षितं तस्मै ददौ भरतसत्तमः
१४ ततस तु परकृतीः सर्वाः समानाय्य युधिष्ठिरः
सर्वम आचष्ट राजर्षिश चिकीर्षतम अथात्मनः
१५ ते शरुत्वैव वचस तस्य पौरजानपदा जना
भृशम उद्विग्नमनसो नाभ्यनन्दन्त तद वचः
१६ नैवं कर्तव्यम इति ते तदोचुस ते नराधिपम
न च राजा तथाकार्षीत कालपर्याय धर्मवित
१७ ततो ऽनुमान्य धर्मात्मा पौरजानपदं जनम
गमनाय मतिं चक्रे भरातरश चास्य ते तदा
१८ ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः
उत्सृज्याभरणान्य अङ्गाज जगृहे वल्कलान्य उत
१९ भीमार्जुनौ यमौ चैव दरौपदी च यशस्विनी
तथैव सर्वे जगृहुर वल्कलानि जनाधिप
२० विधिवत कारयित्वेष्टिं नैष्ठिकीं भरतर्षभ
समुत्सृज्याप्सु सर्वे ऽगनीन परतस्थुर नरपुंगवा
२१ ततः पररुरुदुः सर्वाः सत्रियो दृष्ट्वा नरर्षभान
परस्थितान दरौपदी षष्ठान पुरा दयूतजितान यथा
२२ हर्षो ऽभवच च सर्वेषां भरातॄणां गमनं परति
युधिष्ठिर मतं जञात्वा वृष्णिक्षयम अवेक्ष्य च

yadūnāṃ pariśeṣaś ca vajro rājā kṛtaś ca ha
9 parikṣid dhāstina pure śakra prasthe tu yādavaḥ
vajro rājā tvayā rakṣyo mā cādharme manaḥ kṛthāḥ
10 ity uktvā dharmarājaḥ sa vāsudevasya dhīmataḥ
mātulasya ca vṛddhasya rāmādīnāṃ tathaiva ca
11 mātṛbhiḥ sahadharmātmā kṛtvodakam atandritaḥ
śrāddhāny uddiśya sarveṣāṃ cakāra vidhivat tadā
12 dadau ratnāni vāsāṃsi grāmān aśvān rathān api
striyaś ca dvijamukhyebhyo gavāṃ śatasahasraśaḥ
13 kṛpam abhyarcya ca gurum arthamānapuraskṛtam
śiṣyaṃ parikṣitaṃ tasmai dadau bharatasattamaḥ
14 tatas tu prakṛtīḥ sarvāḥ samānāyya yudhiṣṭhiraḥ
sarvam ācaṣṭa rājarṣiś cikīrṣatam athātmanaḥ
15 te śrutvaiva vacas tasya paurajānapadā janāḥ
bhṛśam udvignamanaso nābhyanandanta tad vacaḥ
16 naivaṃ kartavyam iti te tadocus te narādhipam
na ca rājā tathākārṣīt kālaparyāya dharmavit
17 tato ’numānya dharmātmā paurajānapadaṃ janam
gamanāya matiṃ cakre bhrātaraś cāsya te tadā
18 tataḥ sa rājā kauravyo dharmaputro yudhiṣṭhiraḥ
utsṛjyābharaṇāny aṅgāj jagṛhe valkalāny uta
19 bhīmārjunau yamau caiva draupadī ca yaśasvinī
tathaiva sarve jagṛhur valkalāni janādhipa
20 vidhivat kārayitveṣṭiṃ naiṣṭhikīṃ bharatarṣabha
samutsṛjyāpsu sarve ’gnīn pratasthur narapuṃgavāḥ
21 tataḥ praruruduḥ sarvāḥ striyo dṛṣṭvā nararṣabhān
prasthitān draupadī ṣaṣṭhān purā dyūtajitān yathā
22 harṣo ’bhavac ca sarveṣāṃ bhrātṝṇāṃ gamanaṃ prati
yudhiṣṭhira mataṃ jñātvā vṛṣṇikṣayam avekṣya ca

२३ भरातरः पञ्च कृष्णा च षष्ठी शवा चैव सप्तमः
आत्मना सप्तमॊ राजा निर्ययौ गजसाह्वयात
पौरैर अनुगतॊ दूरं सर्वैर अन्तःपुरैस तथा
२४ न चैनम अशकत कश्चि चिन निवर्तस्वेति भाषितुम
नयवर्तन्त ततः सर्वे नरा नगरवासिनः
२५ कृप परभृतयश चैव युयुत्सुं पर्यवारयन
विवेश गङ्गां कौरव्य उलूपी भुजगात्मजा
२६ चित्राङ्गदा ययौ चापि मणिपूर पुरं परति
शिष्टाः परिक्षितं तव अन्या मातरः पर्यवारयन
२७ पाण्डवाश च महात्मानॊ दरौपदी च यशस्विनी
कृपॊपवासाः कौरव्य परययुः पराङ्मुखास ततः
२८ यॊगयुक्ता महात्मानस तयागधर्मम उपेयुषः
अभिजग्मुर बहून देशान सरितः सागरांस तथा
२९ युधिष्ठिरॊ ययाव अग्रे भीमस तु तदनन्तरम
अर्जुनस तस्य चान्व एव यमौ चैव यथाक्रमम
३० पृष्ठतस तु वरारॊहा शयामा पद्मदलेक्षणा
दरौपदी यॊषितां शरेष्ठा ययौ भरतसत्तम
३१ शवा चैवानुययाव एकः पाण्डवान परस्थितान वने
करमेण ते ययुर वीरा लौहित्यं सलिलार्णवम
३२ गाण्डीवं च धनुर दिव्यं न मुमॊच धनंजयः
रत्नलॊभान महाराज तौ चाक्षय्यौ महेषुधी
३३ अग्निं ते ददृशुस तत्र सथितं शैलम इवाग्रतः
मार्गम आवृत्य तिष्ठन्तं साक्षात पुरुषविग्रहम
३४ ततॊ देवः स सप्तार्चिः पाण्डवान इदम अब्रवीत
भॊ भॊ पाण्डुसुता वीराः पावकं मा विबॊधत
३५ युधिष्ठिर महाबाहॊ भीमसेन परंतप
अर्जुनाश्वसुतौ वीरौ निबॊधत वचॊ मम
३६ अहम अग्निः कुरुश्रेष्ठा मया दग्धं च खाण्डवम
अर्जुनस्य परभावेन तथा नारायणस्य च

23 bhrātaraḥ pañca kṛṣṇā ca ṣaṣṭhī śvā caiva saptamaḥ
ātmanā saptamo rājā niryayau gajasāhvayāt
paurair anugato dūraṃ sarvair antaḥpurais tathā
24 na cainam aśakat kaśc cin nivartasveti bhāṣitum
nyavartanta tataḥ sarve narā nagaravāsinaḥ
25 kṛpa prabbhṛtayaś caiva yuyutsuṃ paryavārayan
viveśa gaṅgāṃ kauravya ulūpī bhujagātmajā
26 citrāṅgadā yayau cāpi maṇipūra puraṃ prati
śiṣṭāḥ parikṣitaṃ tv anyā mātaraḥ paryavārayan
27 pāṇḍavāś ca mahātmāno draupadī ca yaśasvinī
kṛpopavāsāḥ kauravya prayayuḥ prāṅmukhās tataḥ
28 yogayuktā mahātmānas tyāgadharmam upeyuṣaḥ
abhijagmur bahūn deśān saritaḥ sāgarāṃs tathā
29 yudhiṣṭhiro yayāv agre bhīmas tu tadanantaram
arjunas tasya cānv eva yamau caiva yathākramam
30 pṛṣṭhatas tu varārohā śyāmā padmadalekṣaṇā
draupadī yoṣitāṃ śreṣṭhā yayau bharatasattama
31 śvā caivānuyayāv ekaḥ pāṇḍavān prasthitān vane
krameṇa te yayur vīrā lauhityaṃ salilārṇavam
32 gāṇḍīvaṃ ca dhanur divyaṃ na mumoca dhanaṃjayaḥ
ratnalobhān mahārāja tau cākṣayyau maheṣudhī
33 agniṃ te dadṛśus tatra sthitaṃ śailam ivāgrataḥ
mārgam āvṛtya tiṣṭhantaṃ sākṣāt puruṣavigraham
34 tato devaḥ sa saptārciḥ pāṇḍavān idam abravīt
bho bho pāṇḍusutā vīrāḥ pāvakaṃ mā vibodhata
35 yudhiṣṭhira mahābāho bhīmasena paraṃtapa
arjunāśvasutau vīrau nibodhata vaco mama
36 aham agniḥ kuruśreṣṭhā mayā dagdhaṃ ca khāṇḍavam
arjunasya prabhāvena tathā nārāyaṇasya ca

३७ अयं वः फल्गुनॊ भराता गाण्डीवं परमायुधम
परित्यज्य वनं यातु नानेनार्थॊ ऽसति कश चन
३८ चक्ररत्नं तु यत कृष्णे सथितम आसीन महात्मनि
गतं तच चा पुनर हस्ते कालेनैष्यति तस्य ह
३९ वरुणाद आहृतं पूर्वं मयैतत पार्थ कारणात
गाण्डीवं कार्मुकश्रेष्ठं वरुणायैव दीयताम
४० ततस ते भरातरः सर्वे धनंजयम अचॊदयन
स जले पराक्षिपत तत तु तथाक्षय्यौ महेषुधी
४१ ततॊ ऽगनिर भरतश्रेष्ठ तत्रैवान्तरधीयत
ययुश च पाण्डवा वीरास ततस ते दक्षिणामुखा
४२ ततस ते तूत्तरेणैव तीरेण लवणाम्भसः
जग्मुर भरतशार्दूल दिशं दक्षिणपश्चिमम
४३ ततः पुनः समावृत्ताः पश्चिमां दिशम एव ते
ददृशुर दवारकां चापि सागरेण परिप्लुताम
४४ उदीचीं पुनर आवृत्त्य ययुर भरतसत्तमा
परादक्षिण्यं चिकीर्षन्तः पृथिव्या यॊगधर्मिणः

37 ayaṃ vaḥ phalguno bhrātā gāṇḍīvaṃ paramāyudham
parityajya vanaṃ yātu nānenārtho ’sti kaś cana
38 cakraratnaṃ tu yat kṛṣṇe sthitam āsīn mahātmani
gataṃ tac cā punar haste kālenaiṣyati tasya ha
39 varuṇād āhṛtaṃ pūrvaṃ mayaitat pārtha kāraṇāt
gāṇḍīvaṃ kārmukaśreṣṭhaṃ varuṇāyaiva dīyatām
40 tatas te bhrātaraḥ sarve dhanaṃjayam acodayan
sa jale prākṣipat tat tu tathākṣayyau maheṣudhī
41 tato ’gnir bharataśreṣṭha tatraivāntaradhīyata
yayuś ca pāṇḍavā vīrās tatas te dakṣiṇāmukhāḥ
42 tatas te tūttareṇaiva tīreṇa lavaṇāmbhasaḥ
jagmur bharataśārdūla diśaṃ dakṣiṇapaścimam
43 tataḥ punaḥ samāvṛttāḥ paścimāṃ diśam eva te
dadṛśur dvārakāṃ cāpi sāgareṇa pariplutām
44 udīcīṃ punar āvṛttya yayur bharatasattamāḥ
prādakṣiṇyaṃ cikīrṣantaḥ pṛthivyā yogadharmiṇaḥ

## Chapter 2

१ [वै]
ततस ते नियतात्मान उदीचीं दिशम आस्थिता
ददृशुर यॊगयुक्ताश च हिमवन्तं महागिरिम
२ तं चाप्य अतिक्रमन्तस ते ददृशुर वालुकार्णवम
अवैक्षन्त महाशैलं मेरुं शिखरिणां वरम
३ तेषां तु गच्छतां शीघ्रं सर्वेषां यॊगधर्मिणाम
याज्ञसेनी भरष्टयॊगा निपपात महीतले
४ तां तु परपतितां दृष्ट्वा भीमसेनॊ महाबलः
उवाच धर्मराजानं याज्ञसेनीम अवेक्ष्य ह
५ नाधर्मश चरितः कश चिद राजपुत्र्या परंतप

1 [vai]
tatas te niyatātmāna udīcīṃ diśam āsthitāḥ
dadṛśur yogayuktāś ca himavantaṃ mahāgirim
2 taṃ cāpy atikramantas te dadṛśur vālukārṇavam
avaikṣanta mahāśailaṃ meruṃ śikhariṇāṃ varam
3 teṣāṃ tu gacchatāṃ śīghraṃ sarveṣāṃ yogadharmiṇām
yājñasenī bhraṣṭayogā nipapāta mahītale
4 tāṃ tu prapatitāṃ dṛṣṭvā bhīmaseno mahābalaḥ
uvāca dharmarājānaṃ yājñasenīm avekṣya ha
5 nādharmaś caritaḥ kaś cid rājaputryā paraṃtapa

कारणं किं नु तद राजन यत कृष्णा पतिता भुवि
६ [य]
पक्षपातॊ महान अस्या विशेषेण धनंजये
तस्यैतत फलम अद्यैषा भुङ्क्ते पुरुषसत्तम
७ [वै]
एवम उक्त्वानवेक्ष्यैनां ययौ धर्मसुतॊ नृपः
समाधाय मनॊ धीमन धर्मात्मा पुरुषर्षभः
८ सहदेवस ततॊ धीमान निपपात महीतले
तं चापि पतितं दृष्ट्वा भीमॊ राजानम अब्रवीत
९ यॊ ऽयम अस्मासु सर्वेषु शुश्रूषुर अनहंकृतः
सॊ ऽयं माद्रवती पुत्रः कस्मान निपतितॊ भुवि
१० [य]
आत्मनः सदृशं पराज्ञं नैषॊ ऽमन्यत कं चन
तेन दॊषेण पतितस तस्माद एष नृपात्मजः
११ [वै]
इत्य उक्त्वा तु समुत्सृज्य सहदेवं ययौ तदा
भरातृभिः सह कौन्तेयः शुना चैव युधिष्ठिरः
१२ कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम
आर्तॊ बन्धुप्रियः शूरॊ नकुलॊ निपपात ह
१३ तस्मिन निपतिते वीरे नकुले चारुदर्शने
पुनर एव तदा भीमॊ राजानम इदम अब्रवीत
१४ यॊ ऽयम अक्षत धर्मात्मा भराता वचनकारकः
रूपेणाप्रतिमॊ लॊके नकुलः पतितॊ भुवि
१५ इत्य उक्तॊ भीमसेनेन परत्युवाच युधिष्ठिरः
नकुलं परति धर्मात्मा सर्वबुद्धिमतां वरः
१६ रूपेण मत्समॊ नास्ति कश चिद इत्य अस्य दर्शनम
अधिकश चाहम एवैक इत्य अस्य मनसि सथितम
१७ नकुलः पतितस तस्माद आगच्छ तवं वृकॊदर
यस्य यद विहितं वीर सॊ ऽवश्यं तद उपाश्नुते

kāraṇaṃ kiṃ nu tad rājan yat kṛṣṇā patitā bhuvi
6 [y]
pakṣapāto mahān asyā viśeṣeṇa dhanaṃjaye
tasyaitat phalam adyaiṣā bhuṅkte puruṣasattama
7 [vai]
evam uktvānavekṣyainām̐ yayau dharmasuto nṛpaḥ
samādhāya mano dhīman dharmātmā puruṣarṣabhaḥ
8 sahadevas tato dhīmān nipapāta mahītale
taṃ cāpi patitaṃ dṛṣṭvā bhīmo rājānam abravīt
9 yo 'yam asmāsu sarveṣu śuśrūṣur anahaṃkṛtaḥ
so 'yaṃ mādravatī putraḥ kasmān nipatito bhuvi
10 [y]
ātmanaḥ sadṛśaṃ prājñaṃ naiṣo 'manyata kaṃ cana
tena doṣeṇa patitas tasmād eṣa nṛpātmajaḥ
11 [vai]
ity uktvā tu samutsṛjya sahadevaṃ yayau tadā
bhrātṛbhiḥ saha kaunteyaḥ śunā caiva yudhiṣṭhiraḥ
12 kṛṣṇām̐ nipatitām̐ dṛṣṭvā sahadevaṃ ca pāṇḍavam
ārto bandhupriyaḥ śūro nakulo nipapāta ha
13 tasmin nipatite vīre nakule cārudarśane
punar eva tadā bhīmo rājānam idam abravīt
14 yo 'yam akṣata dharmātmā bhrātā vacanakārakaḥ
rūpeṇāpratimo loke nakulaḥ patito bhuvi
15 ity ukto bhīmasenena pratyuvāca yudhiṣṭhiraḥ
nakulaṃ prati dharmātmā sarvabuddhimatām̐ varaḥ
16 rūpeṇa matsamo nāsti kaś cid ity asya darśanam
adhikaś cāham evaika ity asya manasi sthitam
17 nakulaḥ patitas tasmād āgaccha tvaṃ vṛkodara
yasya yad vihitaṃ vīra so 'vaśyaṃ tad upāśnute

१८ तांस तु परपतितान दृष्ट्वा पाण्डवः शवेतवाहनः
पपात शॊकसंतप्तस ततॊ ऽनु परवीरहा
१९ तस्मिंस तु पुरुषव्याघ्रे पतिते शक्र तेजसि
मरियमाणे दुराधर्षे भीमॊ राजानम अब्रवीत
२० अनृतं न समराम्य अस्य सवैरेष्व अपि महात्मनः
अथ कस्य विकारॊ ऽयं येनायं पतितॊ भुवि
२१ [य]
एकाह्ना निर्दहेयं वै शत्रून इत्य अर्जुनॊ ऽबरवीत
न च तत कृतवान एष शूरमानी ततॊ ऽपतत
२२ अवमेने धनुर गराहान एष सर्वांश च फल्गुनः
यथा चॊक्तं तथा चैव कर्तव्यं भूतिम इच्छता
२३ [वै]
इत्य उक्त्वा परस्थितॊ राजा भीमॊ ऽथ निपपात ह
पतितश चाब्रवीद भीमॊ धर्मराजं युधिष्ठिरम
२४ भॊ भॊ राजन्न अवेक्षस्व पतितॊ ऽहं परियस तव
किंनिमित्तं च पतितं बरूहि मे यदि वेत्थ ह
२५ [य]
अतिभुक्तं च भवता पराणेन च विकत्थसे
अनवेक्ष्य परं पार्थ तेनासि पतितः कषितौ
२६ [वै]
इत्य उक्त्वा तं महाबाहुर जगामानवलॊकयन
शवा तव एकॊ ऽनुययौ यस ते बहुशः कीर्तितॊ मया

18 tāṃs tu prapatitān dṛṣṭvā pāṇḍavaḥ śvetavāhanaḥ
papāta śokasaṃtaptas tato ’nu paravīrahā
19 tasmiṃs tu puruṣavyāghre patite śakra tejasi
mriyamāṇe durādharṣe bhīmo rājānam abravīt
20 anṛtaṃ na smarāmy asya svaireṣv api mahātmanaḥ
atha kasya vikāro ’yaṃ yenāyaṃ patito bhuvi
21 [y]
ekāhnā nirdaheyaṃ vai śatrūn ity arjuno ’bravīt
na ca tat kṛtavān eṣa śūramānī tato ’patat
22 avamene dhanur grāhān eṣa sarvāṃś ca phalgunaḥ
yathā coktaṃ tathā caiva kartavyaṃ bhūtim icchatā
23 [vai]
ity uktvā prasthito rājā bhīmo ’tha nipapāta ha
patitaś cābravīd bhīmo dharmarājaṃ yudhiṣṭhiram
24 bho bho rājann avekṣasva patito ’haṃ priyas tava
kiṃnimittaṃ ca patitaṃ brūhi me yadi vettha ha
25 [y]
atibhuktaṃ ca bhavatā prāṇena ca vikatthase
anavekṣya paraṃ pārtha tenāsi patitaḥ kṣitau
26 [vai]
ity uktvā taṃ mahābāhur jagāmānavalokayan
śvā tv eko ’nuyayau yas te bahuśaḥ kīrtito mayā

## Chapter 3

१ [वै]
ततः संनादयञ शक्रॊ दिवं भूमिं च सर्वशः
रथेनॊपययौ पार्थम आरॊहेत्य अब्रवीच च तम
२ स भरातॄन पतितान दृष्ट्वा धर्मराजॊ युधिष्ठिरः
अब्रवीच छॊकसंतप्तः सहस्राक्षम इदं वचः

1 [vai]
tataḥ saṃnādayañ śakro divaṃ bhūmiṃ ca sarvaśaḥ
rathenopayayau pārtham ārohety abravīc ca tam
2 sa bhrātṝn patitān dṛṣṭvā dharmarājo yudhiṣṭhiraḥ
abravīc chokasaṃtaptaḥ sahasrākṣam idaṃ vacaḥ

३ भरातरः पतिता मे ऽतर आगच्छेयुर मया सह
न विना भरातृभिः सवर्गम इच्छे गन्तुं सुरेश्वर
४ सुकुमारी सुखार्हा च राजपुत्री पुरंदर
सास्माभिः सह गच्छेत तद भवान अनुमन्यताम
५ [इन्द्र]
भरातॄन दरक्ष्यसि पुत्रांस तवम अग्रतस तरिदिवं गतान
कृष्णया सहितान सर्वान मा शुचो भरतर्षभ
६ निक्षिप्य मानुषं देहं गतास ते भरतर्षभ
अनेन तवं शरीरेण सवर्गं गन्ता न संशयः
७ [य]
अथ शवा भूतभाव्येश भक्तो मां नित्यम एव ह
स गच्छेत मया सार्धम आनृशंस्या हि मे मतिः
८ [इन्द्र]
अमर्त्यत्वं मत सामत्वं च राजञ ; शरियं कृत्स्नां महतीं चैव कीर्तिम
संप्राप्तो ऽदय सवर्गसुखानि च तवं ; तयज शवानं नात्र नृशंसम अस्ति
९ [य]
अनार्यम आर्येण सहस्रनेत्र ; शक्यं कर्तुं दुष्करम एतद आर्य
मा मे शरिया संगमनं तयास्तु ; यस्याः कृते भक्त जनं तयजेयम
१० [इन्द्र]
सवर्गे लोके शववतां नास्ति धिष्ण्यम ; इष्टापूर्तं करोधवशा हरन्ति
ततो विचार्य करियतां धर्मराज ; तयज शवानं नात्र नृशंसम अस्ति
११ [य]
भक्त तयागं पराहुर अत्यन्तपापं ; तुल्यं लोके बरह्म वध्या कृतेन
तस्मान नाहं जातु कथं चनाद्य ; तयक्ष्याम्य एनं सवसुखार्थी महेन्द्र
१२ [इन्द्र]
शुना दृष्टं करोधवशा हरन्ति ; यद दत्तम इष्टं विवृतम अथो हुतं च

3 bhrātaraḥ patitā me ’tra āgaccheyur mayā saha
na vinā bhrātṛbhiḥ svargam icche gantuṃ sureśvara
4 sukumārī sukhārhā ca rājaputrī puraṃdara
sāsmābhiḥ saha gaccheta tad bhavān anumanyatām
5 [indra]
bhrātṝn drakṣyasi putrāṃs tvam agratas tridivaṃ gatān
kṛṣṇayā sahitān sarvān mā śuco bharatarṣabha
6 nikṣipya mānuṣaṃ dehaṃ gatās te bharatarṣabha
anena tvaṃ śarīreṇa svargaṃ gantā na saṃśayaḥ
7 [y]
atha śvā bhūtabhāvyeśa bhakto māṃ nityam eva ha
sa gaccheta mayā sārdham ānṛśaṃsyā hi me matiḥ
8 [indra]
amartyatvaṃ mat sāmatvaṃ ca rājañ; śriyaṃ kṛtsnāṃ mahatīṃ caiva kīrtim
saṃprāpto ’dya svargasukhāni ca tvaṃ; tyaja śvānaṃ nātra nṛśaṃsam asti
9 [y]
anāryam āryeṇa sahasranetra; śakyaṃ kartuṃ duṣkaram etad ārya
mā me śriyā saṃgamanaṃ tayāstu; yasyāḥ kṛte bhakta janaṃ tyajeyam
10 [indra]
svarge loke śvavatāṃ nāsti dhiṣṇyam; iṣṭāpūrtaṃ krodhavaśā haranti
tato vicārya kriyatāṃ dharmarāja; tyaja śvānaṃ nātra nṛśaṃsam asti
11 [y]
bhakta tyāgaṃ prāhur atyantapāpaṃ; tulyaṃ loke brahma vadhyā kṛtena
tasmān nāhaṃ jātu kathaṃ canādya; tyakṣyāmy enaṃ svasukhārthī mahendra
12 [indra]
śunā dṛṣṭaṃ krodhavaśā haranti; yad dattam iṣṭaṃ vivṛtam atho hutaṃ ca

तस्माच छुनस तयागम इमं कुरुष्व ; शुनस तयागात पराप्यसे देवलोकम

१३ तयक्त्वा भरातॄन दयितां चापि कृष्णां ; पराप्तो लोकः कर्मणा सवेन वीर

शवानं चैनं न तयजसे कथं नु ; तयागं कृत्स्नं चास्थितो मुह्यसे ऽदय
१४ [य]
न विद्यते संधिर अथापि विग्रहो; मृतैर मर्त्यैर इति लोकेषु निष्ठा
न ते मया जीवयितुं हि शक्या; तस्मात तयागस तेषु कृतो न जीवताम
१५ परतिप्रदानं शरणागतस्य ; सत्रिया वधो बराह्मणस्व आपहारः
मित्रद्रोहस तानि चत्वारि शक्र ; भक्त तयागश चैव समो मतो मे
१६ [वै]
तद धर्मराजस्य वचो निशम्य ; धर्मस्वरूपी भगवान उवाच

युधिष्ठिरं परति युक्तो नरेन्द्रं ; शलक्ष्णैर वाक्यैः संस्तव संप्रयुक्तैः
१७ अभिजातो ऽसि राजेन्द्र पितुर वृत्तेन मेधया
अनुक्रोशेन चानेन सर्वभूतेषु भारत
१८ पुरा दवैतवने चासि मया पुत्र परीक्षितः
पानीयार्थे पराक्रान्ता यत्र ते भरातरो हता
१९ भीमार्जुनौ परित्यज्य यत्र तवं भरातराव उभौ
मात्रोः साम्यम अभीप्सन वै नकुलं जीवम इच्छसि
२० अयं शवा भक्त इत्य एव तयक्तो देव रथस तवया
तस्मात सवर्गे न ते तुल्यः कश चिद अस्ति नराधिप
२१ अतस तवाक्षया लोकाः सवशरीरेण भारत
पराप्तो ऽसि भरतश्रेष्ठ दिव्यां गतिम अनुत्तमाम
२२ ततो धर्मश च शक्रश च मरुतश चाश्विनाव अपि
देवा देवर्षयश चैव रथम आरोप्य पाण्डवम
२३ परययुः सवैर विमानैस ते सिद्धाः कामविहारिणः
सर्वे विरजसः पुण्याः पुण्यवाग बुद्धिकर्मिणः
२४ स तं रथं समास्थाय राजा कुरुकुलोद्वहः

tasmāc chunas tyāgam imaṃ kuruṣva; śunas tyāgāt prāpyase devalokam
13 tyaktvā bhrātṝn dayitāṃ cāpi kṛṣṇāṃ; prāpto lokaḥ karmaṇā svena vīra
śvānaṃ cainaṃ na tyajase kathaṃ nu; tyāgaṃ kṛtsnaṃ cāsthito muhyase ’dya
14 [y]
na vidyate saṃdhir athāpi vigraho; mṛtair martyair iti lokeṣu niṣṭhā
na te mayā jīvayituṃ hi śakyā; tasmāt tyāgas teṣu kṛto na jīvatām
15 pratipradānaṃ śaraṇāgatasya; striyā vadho brāhmaṇasv āpahāraḥ
mitradrohas tāni catvāri śakra; bhakta tyāgaś caiva samo mato me
16 [vai]
tad dharmarājasya vaco niśamya; dharmasvarūpī bhagavān uvāca
yudhiṣṭhiraṃ prati yukto narendraṃ; ślakṣṇair vākyaiḥ saṃstava saṃprayuktaiḥ
17 abhijāto ’si rājendra pitur vṛttena medhayā
anukrośena cānena sarvabhūteṣu bhārata
18 purā dvaitavane cāsi mayā putra parīkṣitaḥ
pānīyārthe parākrāntā yatra te bhrātaro hatāḥ
19 bhīmārjunau parityajya yatra tvaṃ bhrātarāv ubhau
mātroḥ sāmyam abhīpsan vai nakulaṃ jīvam icchasi
20 ayaṃ śvā bhakta ity eva tyakto deva rathas tvayā
tasmāt svarge na te tulyaḥ kaś cid asti narādhipa
21 atas tavākṣayā lokāḥ svaśarīreṇa bhārata
prāpto ’si bharataśreṣṭha divyāṃ gatim anuttamām
22 tato dharmaś ca śakraś ca marutaś cāśvināv api
devā devarṣayaś caiva ratham āropya pāṇḍavam
23 prayayuḥ svair vimānais te siddhāḥ kāmavihāriṇaḥ
sarve virajasaḥ puṇyāḥ puṇyavāg buddhikarmiṇaḥ
24 sa taṃ rathaṃ samāsthāya rājā kurukulodvahaḥ

ऊर्ध्वम आचक्रमे शीघ्रं तेजसावृत्य रोदसी
२५ ततो देव निकायस्थो नारदः सर्वलोकवित
उवाचोच्चैस तदा वाक्यं बृहद वादी बृहत तपा
२६ ये ऽपि राजर्षयः सर्वे ते चापि समुपस्थिता
कीर्तिं परच्छाद्य तेषां वै कुरुराजो ऽधितिष्ठति
२७ लोकान आवृत्य यशसा तेजसा वृत्तसंपदा
सवशरीरेण संप्राप्तं नान्यं शुश्रुम पाण्डवात
२८ नारदस्य वचः शरुत्वा राजा वचनम अब्रवीत
देवान आमन्त्र्य धर्मात्मा सवपक्षांश चैव पार्थिवान
२९ शुभं वा यदि वा पापं भरातॄणां सथानम अद्य मे
तद एव पराप्तुम इच्छामि लोकान अन्यान न कामये
३० राज्ञस तु वचनं शरुत्वा देवराजः पुरंदरः
आनृशंस्य समायुक्तं परत्युवाच युधिष्ठिरम
३१ सथाने ऽसमिन वस राजेन्द्र कर्मभिर निर्जिते शुभैः
किं तवं मानुष्यकं सनेहम अद्यापि परिकर्षसि
३२ सिद्धिं पराप्तो ऽसि परमां यथा नान्यः पुमान कव चित
नैव ते भरातरः सथानं संप्राप्ताः कुरुनन्दन
३३ अद्यापि मानुषो भावः सपृशते तवां नराधिप
सवर्गो ऽयं पश्य देवर्षीन सिद्धांश च तरिदिवालयान
३४ युधिष्ठिरस तु देवेन्द्रम एवं वादिनम ईश्वरम
पुनर एवाब्रवीद धीमान इदं वचनम अर्थवत
३५ तैर विना नोत्सहे वस्तुम इह दैत्य निबर्हण
गन्तुम इच्छामि तत्राहं यत्र मे भरातरो गता
३६ यत्र सा बृहती शयामा बुद्धिसत्त्वगुणान्विता
दरौपदी योषितां शरेष्ठा यत्र चैव परिया मम

ūrdhvam ācakrame śīghraṃ tejasāvṛtya rodasī
25 tato deva nikāyastho nāradaḥ sarvalokavit
uvācoccais tadā vākyaṃ bṛhad vādī bṛhat tapāḥ
26 ye ’pi rājarṣayaḥ sarve te cāpi samupasthitāḥ
kīrtiṃ pracchādya teṣāṃ vai kururājo ’dhitiṣṭhati
27 lokān āvṛtya yaśasā tejasā vṛttasaṃpadā
svaśarīreṇa saṃprāptaṃ nānyaṃ śuśruma pāṇḍavāt
28 nāradasya vacaḥ śrutvā rājā vacanam abravīt
devān āmantrya dharmātmā svapakṣāṃś caiva pārthivān
29 śubhaṃ vā yadi vā pāpaṃ bhrātṝṇāṃ sthānam adya me
tad eva prāptum icchāmi lokān anyān na kāmaye
30 rājñas tu vacanaṃ śrutvā devarājaḥ puraṃdaraḥ
ānṛśaṃsya samāyuktaṃ pratyuvāca yudhiṣṭhiram
31 sthāne ’smin vasa rājendra karmabhir nirjite śubhaiḥ
kiṃ tvaṃ mānuṣyakaṃ sneham adyāpi parikarṣasi
32 siddhiṃ prāpto ’si paramāṃ yathā nānyaḥ pumān kva cit
naiva te bhrātaraḥ sthānaṃ saṃprāptāḥ kurunandana
33 adyāpi mānuṣo bhāvaḥ spṛśate tvāṃ narādhipa
svargo ’yaṃ paśya devarṣīn siddhāṃś ca tridivālayān
34 yudhiṣṭhiras tu devendram evaṃ vādinam īśvaram
punar evābravīd dhīmān idaṃ vacanam arthavat
35 tair vinā notsahe vastum iha daitya nibarhaṇa
gantum icchāmi tatrāhaṃ yatra me bhrātaro gatāḥ
36 yatra sā bṛhatī śyāmā buddhisattvaguṇānvitā
draupadī yoṣitāṃ śreṣṭhā yatra caiva priyā mama

ॐ